## त्रयोदशः पाठः

# लोकमङ्‌गलम्

असतो मा सद्‌गमय।

तमसो मा ज्योतिर्गमय।

मृत्योर्माऽमृतं गमय।।

*बृहदारण्यकोपनिषद्* (1.3.28)

यथा द्यौश्च पृथिवी च न बिभीतो न रिष्यतः।
एवा मे प्राण मा बिभेः।।

*अथर्ववेदः* (2.51.1)

यत् स्वप्ने अन्नमश्नामि न प्रातरधिगम्यते।
सर्वं तदस्तु मे शिवं नहि तद् दृश्यते दिवा।।

*अथर्ववेदः* (7.101.1)

सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु।।

*विक्रमोर्वशीयम्* (5.25)







## शब्दार्थाः

| | | | |
|---|---|---|---|
| असतो | – | असत्/बुराई से | from evil/non-existent |
| सद् | – | सत्/अच्छाई | virtuous/good/ existent |
| तमसो | – | अंधकार से/अज्ञान से | from darkness/ ignorance |
| गमय | – | ले चलो | take to |
| मृत्योः | – | मृत्यु से | from death |
| अमृतम् | – | अमरत्व को | towards immortality |
| द्यौः | – | अंतरिक्ष, द्युलोक | heaven/sky |
| बिभीतः | – | डराते हैं | frighten |
| रिष्यतः | – | दुःख देते हैं | pinch/give pain |
| बिभेः | – | डरो | be afraid |
| एवा | – | ऐसे ही | in the same way |
| अश्नामि | – | खाता हूँ | consume |
| अधिगम्यते | – | प्राप्त होता है | is acquired |
| अस्तु | – | हो | let it be |
| शिवम् | – | कल्याणकारी | good/beneficial |
| दृश्यते | – | दिखता है | is seen |
| दिवा | – | दिन | day |
| दुर्गाणि | – | कठिनाईयों को | difficulties |
| तरतु | – | पार करे | may get away |
| भद्राणि | – | कल्याणकारी | beneficial |
| पश्यतु | – | देखें | may see |



| | | | |
|---|---|---|---|
| **कामान्** | – | कामनाओं को | desirable objects |
| **अवाप्नोतु** (अव+आप्नोतु) | – | प्राप्त करें | may find |
| **नन्दतु** | – | प्रसन्न रहें | may be pleased |
| **सर्वत्र** | – | सब जगह | everywhere |

## अभ्यासः



**1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| ज्योतिर्गमय | द्यौश्च | अन्नमश्नामि |
| प्रातरधिगम्यते | सर्वस्तरतु | दुर्गाणि |
| वृहदारण्यकोपनिषद् | कामानवाप्नोतु | भद्राणि |

**2. सर्वान् मन्त्रान् श्लोकं च सस्वरं गायत।**

**3. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत-**

(क) दुर्गाणि कः तरतु?

(ख) सर्वत्र कः नन्दतु?

(ग) कौ न बिभीतः?

(घ) असतो मा कुत्र गमय?

**4. उदाहरणानुसारं पदानि रचयत-**

| लोट्लकारः | लट्लकारः | लोट्लकारः | लट्लकारः |
|---|---|---|---|
| तरतु | तरति | क्रीडतु | ............... |
| पश्यतु | ............... | हसतु | ............... |





| | | | |
|---|---|---|---|
| नन्दतु | .............. | आनयतु | .............. |
| नृत्यतु | .............. | नयतु | .............. |
| अस्तु | .............. | धावतु | .............. |
| गच्छतु | .............. | लिखतु | .............. |

### 5. विलोमपदानि योजयत–

| क | ख |
|---|---|
| प्रातः | सर्वत्र |
| दिवा | स्वप्ने |
| जागरणे | सायम् |
| एकत्र | ज्योतिः |
| तमः | रात्रिः |

### 6. मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थनानि पूरयत–

| न | च | यथा | एव | मा |
|---|---|---|---|---|

(क) .................... देशः तथा वेषः।

(ख) माता पिता .................... शिशून् पालयतः।

(ग) श्रम .................... जयते।

(घ) महात्मा गाँधी सत्यं .................... अत्यजत्।

(ङ) गर्वं .................... कुरु।

